# ॥ भारतभूमातृस्तोत्रम् ॥

.. bhAratabhUmAtRistotra ..

sanskritdocuments.org

April 10, 2015

# Document Information

Text title : bhAratabhUmATRistotram
File name : bhAratabhUmATRistotram.itx
Location : doc_z_misc_general
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, Lakshmi R.S. lakish at gmail.com
Latest update : August 29, 2012
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ भारतभूमातृस्तोत्रम् ॥

## ॥ भारतभूमातृस्तोत्रम् ॥

वन्दे मातरमव्यक्तां व्यक्तां च जननीं पराम् ।
दीनोऽहं बालकः काङ्क्षे सेवां जन्मनि जन्मनि ॥ १॥
सागरालिङ्गितां लक्ष्मीं जगज्जनककन्यकाम् ।
स्थितां हिमनगस्याङ्के पार्वतीमपरां भजे ॥ २॥
शुभ्रं धर्मध्वजं मातुः किं वा राशीकृतं यशः ।
रौप्यं वा मुकुटं दिव्यं वन्देऽहं तं हिमालयम् ॥ ३॥
जाह्नवीयमुनासिन्धुब्रह्मपुत्रशतद्रुभिः ।
भूदेवीं पञ्चधाराभिः सततं साऽभिषिञ्चति ॥ ४॥

नगाधिपं धारयन्तीं मस्तके रत्नमद्वयम् ।
काश्मीरं च ललाटे भ्रूमध्ये नेपालिकां शुभाम् ॥ ५॥

नर्मदातापतीविन्ध्यसप्तपीठकमेखलाम् ।
पूर्वापराचलोरू च मलयं पादपीठके ।
मध्यदेशोदरे गुप्तानक्षयान् धनसञ्चयान् ॥ ६॥

असुराणां पुरी लङ्का दासी यच्चरणयोः कृता ।
तां देवीं भारतीं वन्दे मातरंविश्वपूजिताम् ॥ ७॥

द्रुष्टा चैवोपनिषदां गीतशास्त्रप्रवर्तकः ।
षड्दर्शनप्रवक्ता च भगवान्पाणिनिर्मुनिः ॥ ८॥

वाल्मीकिश्च तथा व्यासः कालिदासो महाकविः ।
आर्यभट्टश्च भरतः शङ्करोऽद्वैतकेसरी ॥ ९॥

भीष्मरामार्जुना वीरा नृपौ रामयुधिष्ठिरौ ।
सावित्री द्रौपदी सीता दमयन्ती च तारका ॥ १०॥

महाधान्यद्वितीयानि रत्नान्येतानि भूतले ।
जननी भारती तेषां रत्नगर्भा कथं न सा ॥ ११॥

वसुन्धरा रत्नगर्भा रसा विश्वम्भरा क्षमा ।

सर्वंसहा स्थिरा चैव भारती भूसुकन्यका ॥ १२॥
रत्नाकरः स्वयं भक्त्या मुक्तोपायनपूर्वकम् ।
चरणान्क्षालयत्यस्या अतन्द्रश्च दिवानिशम् ॥ १३॥
कैलासद्वारकाधीशौ रामेश्वरपुरीश्वरौ ।
द्वारपाला बभूवुश्च सौभाग्यं मातुरद्भुतम् ॥ १४॥

पोष्यन्ति सदा मातुः पर्वतस्तनमण्डलात् ।
निःसृताश्च पयोधाराः सन्ततीनां परम्पराः ॥ १५॥
पुत्रवत्सलता मातुरगाधा हरिणा स्वयम् ।
अवतीर्योदरे सोढं गर्भदुःखं पुनः पुनः ॥ १६॥
मरणे जन्मकाले च मुमूर्षुर्नवबालकः ।
त्वदङ्के चैव संशेते अहो वत्सलता तव ॥ १७॥

पद्मालया त्वमेवासि त्वमेव च सरस्वती ।
अन्नपूर्णा त्वमेवासि त्वमेव च शिवा सती ॥ १८॥
त्वद्वृक्षाः कल्पवृक्षाश्च चिन्तामणिशिलाः शिलाः ।
त्वद्वनं नन्दनं साक्षात्साक्षात्त्वं स्वर्गदेवता ॥ १९॥

प्रतिजन्मनि मे चित्तं वित्तं देहश्च सन्ततिः ।
त्वत्सेवानिरता भूयुर्माता त्वं करुणामयी ॥ २०॥

न मे वाञ्छाऽस्ति यशसि विद्वत्त्वे न च वा सुखे ।
प्रभुत्वं नैव वा स्वर्गे मोक्षेऽत्यानन्ददायके ॥ २१॥

परं च भारते जन्म मान्वस्य च वा पशोः ।
विहङ्गस्य च वा जन्तोर्वृक्षपाषाणयोरपि ॥ २२॥

निरन्तरं भवतु मे मातृसेवांशभाग्यभाक् ।
एषैव वाञ्छा हृदये साक्षी सर्वात्मकः प्रभुः ॥ २३॥

इति श्रीभारतभूमातृस्तोत्रं सम्पूर्णं

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by LakShmi R.S. lakish at gmail.com

---

.. bhAratabhUmAtRistotra ..
was typeset on April 10, 2015

Please send corrections to *sanskrit@cheerful.com*